महा वि॰ का नाम

अ॰ वि॰ एं॰ महावि॰ रहीमपुर, सजरिया।

दिनाङ्क - 27.6.2020

उपशास्त्री द्वितीयवर्ष

(व्याकरण)

भाग - 32

विषय - तत्पुरुष समास प्रकरणम्।

तादर्थ्ये चतुर्थ्यन्तस्य रक्षित शब्देन समासः।

पञ्चमी भयेन। चौरादुद्धं चौरभयम्

भयभीति भीतिभीरिति वाच्यम्' वृकभीतिः

"अपेतापोढमुक्तपतितापत्रस्तैरल्पशः" एते सदाल्पं पञ्चम्यन्तं समस्यते, स तत्पुरुषः। सुखापेतः। कल्पनापोढः। चक्रमुक्तः स्वर्गपतितः। तरङ्गापत्रस्तः। अल्पशः किम् - प्रासादात्पतितः। "स्तोकान्तिक दूरार्थकृच्छ्राणि क्तेन। स्तोकान्मुक्तः। अल्पान्मुक्तः। अन्तिकादागतः। अभ्याशादागतः। विप्रकृष्टादागतः। कृच्छ्रादागतः। पञ्चम्याः स्तोकादिभ्यः' इत्यनुवर्ते राज्ञः पुरुषो राजपुरुषः। "भाजकादिभिश्च" एभिः षष्ठ्यन्तं समस्यते प्रकारमात्रे कर्तरि' इत्यस्य प्रतिप्रसवोऽयम्। ब्राह्मणभाजकः। देवपूजकः। गुणान्तरेण दरलोपश्चेति वक्तव्यम्'। तरबन्तं यद् गुणवाचि तेन सह समासस्तरलोपश्च। 'न निर्धारणे' इति 'पूरणगुण' इति च निषेधस्य प्रतिप्रसवोऽयम्। सर्वेषां श्रेष्ठतरः सर्वश्रेष्ठः। सर्वेषां महत्तरः सर्वमहान्। 'कृत्योगाच्च षष्ठी समस्यते इति वाच्यम्' इत्यस्य प्रत्युदाहरणमिदम्। न निर्धारणे निर्धारणे वा षष्ठी स्यान्न समस्यते। गुणी द्विजः श्रेष्ठः। प्रतिपदविधानाच्च षष्ठी न समस्यते इति

वाच्यम्' सर्पिषो दानम्॥

पञ्चमी भयेन। पञ्चम्यन्तं भयशब्देन सुबन्तेन समस्यत इत्यर्थः। चौरादुद्धं चौरभयमिति। 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात् पञ्चमी। भय भीत भीति भीरिति। शुद्धे भय शब्दस्यैव ग्रहणात् भीतादेरपि समासवचनम्। वृकभीत इति। वृकभीतिः, वृकभीरित्येतदुदाहार्यम्। अत्र भाष्ये अपर आह्युक्त्वा 'भयनिर्गतयुयुत्सुभिरिति वक्तव्यम्' इत्युक्त्वा वृकभयम्, ग्रामनिर्गतः, अल्पभयुयुत्सुः इत्युदाहृतम्। चौरत्रस्तः, भयोपरत इत्यादौ 'युयुत्सा' इति वा मयूरव्यंसकादित्वाद्वा समासः। 'अपेतापोढ'। 'अल्पश'— इति स्वार्थे शस्, अत एव निपातनात्। तदाह— अल्पं पञ्चम्यन्तमिति। 'वक्तव्यार्थानामेकदेशानामेकदेशवचनम्' इति वक्ष्यमाणत्वात्। स्तोकान्तिक। स्तोक, अन्तिक, दूर एतदर्थकानि, कृच्छ्र एतानि पञ्चम्यन्तानि क्तप्रत्ययान्तेन समस्यन्त इत्यर्थः। अर्थग्रहणम् स्तोकादीनां कदूरेषु संपद्यते। अल्पान्मुक्त इति। स्तोकात् पर्याय एवोदाहरणम्। अभ्याशादागत इति। अन्तिकात् पर्यायमेवोदाहरणम्। विप्रकृष्टादागत इति। दूरशब्दपर्यायमुदाहरणम्। कृच्छ्रादागत इति। दूरशब्दपर्यायमुदाहरणम्। 'स्तोकान्तिकदूरार्थेभ्यः' इति पञ्चमी। दूरादागत इत्यत्र तु 'दूरान्तिकार्थेभ्यः' इति पञ्चमी। अत्र 'युधौ धातु' इति युधेर्माशब्दमाह— 'पञ्चम्यन्तं स्तोकादिभ्य इत्यनुगम्यते'।

दिनेशकुमार
(एसोसिएट प्रोफेसर)
(व्याकरण)

Scanned with CamScanner